International Journal of Sanskrit Research 2022; 8(6): 118-121

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(6): 118-121
© 2022 IJSR
www.anantaajournal.com
Received: 16-09-2022
Accepted: 20-10-2022

**ज्ञानदीप्ति बला**
Ph.D. Scholar, MSCBD University, Baripada, Mayurbhanj, Odisha, India

**Corresponding Author:**
**ज्ञानदीप्ति बला**
Ph.D. Scholar, MSCBD University, Baripada, Mayurbhanj, Odisha, India

# चिन्तामणिविजयचम्पूकाव्यस्य छन्दालङ्कारविमर्शः

## ज्ञानदीप्ति बला

**सारांश:**
वेदाङ्गत्वेन शिक्षा-कल्प-छन्द-निरूक्त-व्याकरणं इति षड्सु अङ्गेषु वैदिकवाङ्मय शिक्षास्वाधाय सुरक्षा निमित्तं छन्दशास्त्रं स्वकीयं प्राकष्यं प्रकामं विद्यते। पाणिनीयशिक्षां छन्द:शास्त्रं वेदस्य पादावित्युच्यते। ऋग्यजुस्सामार्थर्वाख्येषु चतुर्षु वेदेषु गायत्र्यनुष्टुप्-त्रिष्टुप्-बृहती-पंक्त्यादीनि छन्दांसि प्रयुज्य बहवो मन्त्राः रचिताः। तत्तच्छन्दसि अक्षर-गण-पादादिव्यवस्थायाः नीतिः निर्धारिताऽस्ति। एवमेव अनुष्टुप्, वसन्ततिलका, मन्दाक्रान्ता, वंशस्थम्, उपजातिः, स्त्रगधरा इत्यादीनि छन्दांसि आश्रित्य कालिदास-भास-भट्टि-भारवि-श्रीहर्षप्रमुखैःमहाकविभिः प्रसिद्धानि काव्यानि प्रणीतानि। एतेषां छन्दसां विषयेऽपि नियमाः विविधैः छन्दशास्त्रकारैः प्रणिताः वर्तन्ते।
एतच्छन्द:शास्त्रं द्विधा विभक्तुं शक्यते। वैदिकं लैकिकं च। अनुष्टुप्-जगती-बृहती-पङ्क्ति-त्रिष्टुप्प्रभृतीनि सप्त वैदिकच्छन्दांसि। लैकिक वसन्ततिलका-शार्दुलविक्रीडित-स्त्रगधराप्रभृतीनि। वैदिकच्छन्दः शास्त्रमधीत्य सांख्यायनश्रौत्रसूत्र-निदानसूत्र-ऋग्प्रातिशाख्यानि च प्रसिद्धानि। तत्र मन्दाक्रान्तायाः लक्षणोदाहरणं नीचैः प्रस्तुयते।

**कूटशब्द:** चिन्तामणिविजयचम्पूः, वेदाङ्गम्, छन्दः, अलंकारः।

## प्रस्तावना

**कतिपयछन्दसां दृष्टान्ताः-**

**१-मन्दाक्रान्ता-**

लक्षणम्- 'मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्।'[१]

**व्याख्या**– मो भनौ तौ गयुग्मं (च ) अम्बुधिरसनगैः (चेत् ) मन्दाक्रान्ता इति पदव्यवस्था। यत्र प्रतिपादं क्रमेण मः-मगणः, भनौ-भगण-नगणौ, तौ-द्वौ तगणौ, गयुग्मं-गुरूवर्णद्वयं च स्युः, तथा अम्बुधिरसनगैः अम्बुधिभिः चतुर्भिः रसैः लौकिकरससंख्यकैः षड्भिः नगैः सप्तभिश्चाक्षरैः यतिरपि चेनत्र मन्दाक्रान्ता इति विधीयते। तथाहि चिन्तामणिविजयचम्पूकाव्ये –

भद्र त्वं किं प्रमथगणपो वाथवा वैनतेयः,
प्रद्युम्नो वा पुरहरदयाप्राप्तकायास्तु स त्वम् ।
आहोस्वित् किं कुटिलहृदयेन स्मरेण प्रयुक्तः,
लोकालोकस्थितजनमिमं बाधितुं वागतोऽसि ।।[२]

**२-शार्दुलविक्रिद्धडितम्** – शार्दुलविक्रीडितस्य लक्षणं नीचैरूपन्यस्तम्।

लक्षणम् – "सूर्याश्वैर्यदि मः सजौ सततगाः शार्दुलविक्रीडितम्"।[३]

**व्याख्या** – मः सजौ सततगाः यदि सूर्यैः अश्वैः (तर्हितत्र) शार्दुलविक्रीडितम् इति पदव्यवस्था । यत्र प्रतेकस्मिन् पादे क्रमेण, मः-मगणः, सजौ –सगणः - जगणौ, सततगाः-सगणः-तगणः-तगणः-गुरवश्च स्युः, पुनः यदि शार्दुलविक्रीडितं छन्दः भवति। शार्दुलविक्रीडितस्य उदाहरणं चिन्तामणिविजयचम्पूकाव्ये दर्शितम् –

"भद्रद्वारि सुमागधादिनुतिभि र्यत्प्राभवः पोष्यते ।
नित्यं यस्य विभूतिलेशवहना निद्रादिदेवा वराः।
तादृगवैभवमित्रबन्धुसहजैस्साकं स्वराष्ट्रं महत् ।
दर्शन्दर्शमतिप्रवृद्धमगमतोषं हि चिन्तामणिः" ।।[४]

**३- उपेन्द्रवज्रा -** अत्र उपेन्द्रवज्रायाः लक्षणमित्थमाकलितम् ।

लक्षणम् - "उपेन्द्रवज्रा प्रथमे लघौ सा ।
एकादशाक्षरसम्बलिता त्रिष्टुब्जातीया वृत्तिः ।।"[६]

**व्याख्या -** इन्द्रवज्रायाः यदि प्रथमो वर्णो लघ्वन्तरेण युक्तो भवति तर्हि सा उपेन्द्रवज्रा इति कथ्यते। तदा एतस्याः जगणः तगणः जगणः अन्ते द्वौ गुरू चेति। उपेन्द्रवज्रायाः उदाहरणं चिन्तामणिविजयचम्पूकाव्ये नीचैः समाम्नातम् –

"चराचराणां चरमाधिदेवो विरोधि विद्रावितबाणशक्तिः ।
निशम्य वैरिप्रहितादिवृक्षान्दुरूहदण्डं समधत्तकालः ।।"[७]

**४-शालिनी –** शालिनी छन्दसः लक्षणं नीचैः प्रस्तुयते ।

लक्षणम् –'मात्तौ गौ चेच्छालिनी वेदलोकैः ।'[८]

**व्याख्या -** यस्मिन्पद्ये प्रत्येकस्मिन् पादे क्रमेण मात् सर्वगुरोः मगणात्। अन्त्यलघु तगणौ, द्वौ गुरूवर्णो यदि भवेयुः तदा शालिनीनामधेयं वृत्तम्। अत्र वेदलोकैः अर्थात् वेदैश्चतुर्भि लोकैसप्तभरचाक्षरैः यतिः कार्या इति। शालिनीछन्दसः उदाहरणं चिन्तामणिविजयचम्पूकाव्ये नीचैरूल्लिखितम् –

"एको रूद्रो न द्वितीयाय तस्थे चेत्याम्नायः प्रत्यहं स्तौतीयं तम् ।
वन्दे शम्भुं देव बृन्दानताङ्घ्रिञ्चन्द्रापीडं भक्तमन्दारवृक्षम् ।।"[९]

**५-वसन्ततिलकम् –** वसन्ततिलकछन्दसः लक्षणं छन्दशास्त्रज्ञैः इत्थं प्रत्यपादि ।

लक्षणम् - 'ज्ञेयं वसन्ततिलकं तभजाः जगौ गः ।'[१०]

**व्याख्या-** तभजाजगौ गः वसन्ततिलकं ज्ञेयमिति पदव्यवस्था। यत्र प्रतिचरणं यथाक्रमेण अन्त्यलधुः तगणः, आदिगुरूः भगणः, द्वौ मध्यगुरू जगणौ, द्वौ गुरूवर्णो च भवन्ति, तत्र वसन्ततिलकं नाम समवृत्तमिति ज्ञेयम्। वृत्तस्यास्य नैकनामान्तराणि समुपलभ्यन्ते। तानि भवन्ति वसन्ततिलका, उद्धर्षिणी,सिंहोन्नता, मधुमाधवीत्यादीनि। वसन्ततिलकछन्दसः उदाहरणं चिन्तामणिविजयचम्पूकाव्ये नीचैः समाख्यातम् –

यत्राङ्गना विजितदेवकलत्ररूपाः,
याः पर्यटन्ति विशिखासु मनोज्ञवेशा :।
तत्सौधजालकनिखातसुदर्पणेषु,
तासां प्रतीकविसराः प्रतिवेश्मरेजु : ।।[११]

**६-अनुष्टुप् -** अनुष्टुपछन्दसः लक्षणं छन्दोविद्भिरित्थमकारि वैदिकवाङ्ये विद्यमानेषु छन्दसु अनुष्टुपब्जातीयच्छन्दसोऽपि परिगणितं विहितम् । यथोक्तम्-

"गायत्री त्रिष्टुब्जगत्यनुष्टुप् पङक्त्या सह ।
बहत्युष्णिहा ककुप् सुचीभिः शम्यन्तु त्वा ।।"[१२]

प्रतिपादमष्टाक्षरविशिष्टवृत्तिः अनुष्टुब्जातीयेति अङ्गीक्रियते। तत्र चित्रपदा, माणविकम्, विद्युन्माला, समानिका, प्रमाणिका, गजगति इति अनुष्टुब्जातीयच्छन्दसः षड्भेदाः दृश्यते। चित्रपदा यदि भौ गौ। व्याख्या - यस्याः प्रतिपादे यदि चेत्, भौ-द्वौ भगणौ, तथा गौ-द्वौ गुरूवर्णो च भवतः। तर्हि सा चित्रपदा नाम वृत्तम्। अनुष्टुपछन्दसः उदाहरणं चिन्तामणिविजयचम्पूकाव्ये नीचैः निगदितम्–

"हन्तहन्त एवैश्वर्यञ्चन्तारस्पर्शनमात्रतः।
यद्यन्मनसि तत्तद्धिनिसर्गादुदभूदिति।।"[१३]

**अलंकाराणां पर्यालोचनम् –**
काव्यस्य लक्षणवचिारे प्रथमतस्तावत अलंकारशास्त्रस्य प्रस्थानानि विवेचनीयानि। तत्तत्प्रस्थानान्तर्भुक्ता आलंकारिकाः स्वस्वप्रस्थानानुसारं काव्यलक्षणं निर्दिशन्ति। अतः काव्यलक्षणालोचनात् प्राक् प्रस्थानानि सम्प्रति विवेच्यन्ते। प्रस्थानानि-अलंकारशास्त्रस्य सन्ति पञ्चप्रस्थानानि। यथा- १-शब्दार्थसाहित्यप्रस्थानम्, २-शब्दार्थप्राधान्यप्रस्थानम्, ३-केवलरसप्रस्थानम्, ४-ध्वनिप्रस्थानम्, ५-ध्वनिध्वंसप्रस्थानञ्च।

**१- शब्दार्थसाहित्यप्रस्थानम् -** इदं प्रस्थानं संक्षेपतः साहित्यप्रस्तानमित्युच्यते लाघवानुरोधेन। अस्मिन् प्रस्थाने शब्दार्थयोः तुल्यप्राधान्येन काव्यघटकत्वमङ्गीक्रियते। भामहविरचितः काव्यालंकारः अस्य प्रस्थानस्य उपजीव्यमानः ग्रन्थः। यद्यपि भामहात् पुर्वमेव बहवः प्राचीनालंकारिका आसन् इति। भामहोक्तेः परिज्ञायते तथापि तत् विरचिताः ग्रन्थाः सम्प्रति नोपलभ्यन्ते। काव्यस्य लक्षणं भामहेन उक्तं 'शब्दार्थौ सहितौ काव्यम्' इति। शब्दश्च अर्थश्च उभौ मिलित्वा काव्यघटकत्वेनापद्यते। वामन-रूद्रट-मम्मट-भट्ट-हेमचन्द्रादयोऽपि साहित्यप्रस्थानस्य प्रख्याता आचार्या आसन्। कविना माघेन 'शब्दार्था सत्कविरिव द्वयं विद्वनपेक्षते'इति वदना अस्यैव प्रस्थानस्य वैशिष्टं प्रदर्शितम्।[१४]

**२- शब्दार्थप्राधान्यप्रस्थानम् -** अस्मिन् प्रस्थाने शब्दास्यैव प्राधान्यं स्वीकृतम् । अस्य प्रस्थानस्य प्राचीनतमो ग्रन्थस्तु दण्डिविरचितः काव्यादर्शः 'शरीरं तावदिष्टार्थं व्यवच्छिन्नापदावली'[१५] इत्युक्त्वा शब्दास्यैव प्राधान्यं अर्थस्य च विशेषणत्वं दण्डिना अत्रोद्घोषितम्। पण्डितराजजगन्नाथोऽपि शब्दाप्रस्थानस्य आचार्यः स काव्यस्य लक्षणं वदति 'रमणीयार्थप्रतिपादकशब्दः काव्यम्'[१६] इति दण्डिनः शब्दप्राधान्यमतं तेन प्रतिपादितम्।

**३-केवलरसप्रस्थानम् –** इदं प्रस्थानमानन्दवर्धनात् प्राचीनैश्चालंकारिकैः प्रतिपादितम्। तथाहि रसप्रस्थानस्य प्राचीनतमः मुख्यः आचार्यो भरतो ब्रवीति-'न हि रसादृते कश्चिदप्यर्थः प्रवर्त्तते।'[१७] अग्निपुराणेऽपि निगदितं 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्।'[१८] अतः अग्निपुराणं रसप्रस्थानस्य समर्थकम् ।

**४- ध्वनिप्रस्थानम्-** अस्य प्रस्थानस्योपलभ्यमानग्रन्थेषु आनन्दवर्धनस्य ध्वन्यालोकग्रन्थः प्राचीनतमः। ध्वनिमतं परम्परया बुधैरङ्गीकृतम्। इति बदता आनन्दवर्धनेन ध्वनिवादस्य प्राचीनत्वं सूचितम्।

**५- ध्वनिध्वंसप्रस्थानम्ञ्च –** केचिदलंकारशास्त्रसूरयः सन्ति ये रसं काव्यस्यात्मेति स्वीकुर्वन्ति परन्तु ध्वनिवादं न मानयन्ति। ध्वनिविरोधिनस्ते ध्वनिध्वंसप्रस्थाने अन्तभर्वन्ति। भट्टनायकः, महिमभट्टः, कुन्तकः, क्षमेन्द्रश्चेति,

चत्वारः सूरयः ध्वनिवादं निराकुर्वन्ति। विख्यातमनीषी महिमभट्टः तदीय व्यक्तिविवेकग्रन्थे सप्रभेदध्वनिम् अनुमाने अन्तर्भावयति। व्यङ्ग्यार्थस्तु अनुमेय एव। शब्दस्य एक व्यापारः अभिधा नाम । अभिधावोध्योऽर्थस्तु वाच्यार्थ एव। वाचार्थ निर्णयं कृत्वा अनुमेयार्थस्य वोधो भवति।

अलंकारशास्त्रं नाम काव्यसमीक्षात्मकं शास्त्रम्। अतोऽस्मिन् शास्त्रे विविधग्रन्थेषु काव्योपजीव्यानि तत्वानि आलोच्यन्ते। किन्निमित्तं काव्यं पठनीयं श्रवणीयं वा नाट्यञ्चापि दर्शनीयम्, काव्यानुशीलनेन किं प्रयोजनं साध्यते इत्यस्मिन् विषये आलंकारिकाः काव्यानुशीलनेन किं प्रयोजनं साध्यते इत्येतस्मिन् विषये आलंकारिकाः सूरयः विचारं कृतवन्तः। वहवोऽलंकारग्रन्थाः भारतवर्षेऽस्मिन् विरचिताः दृश्यन्ते। परन्तु सर्वेषु ग्रन्थेषु एते सर्वे विषयाः नोल्लिख्यन्ते। विषयभेदानुसारं ग्रन्थानां वर्गीकरणमधोलिखितदिशा क्रियते। कति अलंकारग्रन्थाः नाट्यतत्वसहितान् समग्रालंकारशास्त्र विषयान् विचारयन्ति। यथा-साहित्यदर्पणः, प्रतापरूद्रयशोभूषणम् अपरे तु अलंकारग्रन्थाः दृश्यकाव्यत्वं विहाय अलंकारशास्त्रतत्वानि विवेचयन्ति। यथा - काव्यादर्शः, काव्यालंकारसूत्रं, भामहस्य काव्यालंकारः, रूद्रटस्य, वाग्भटस्य, मम्मटस्य। अधुना उपमालंकारलक्षणं विश्वनाथकविराजेन वर्णितम् -

**उपमालंकारः**

लक्षणम् – "साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः।"[१९]

एकस्मिन् वाक्ये उपमान-उपमेययो मध्ये चेत् अवैधर्म्यम् असामञ्जंस्य वा लक्ष्यते तर्हि इवादि उपमा प्रतिपादकशब्दः अथवा क्यय्,क्यडाद प्रत्ययद्वारा अहोस्वित् उपमितसमासेन साम्यं साक्षात् प्रकाश्यते तर्हि तदेव उपमास्थलम्। यदि कश्चित् संकते एकस्मिन् वाक्ये उपमानोपमेयो अवैर्धम साम्यस्य वाच्यत्वे उपमा तर्हि मुख तव तथा भाति यथा रजति चन्द्रमा इति स्थले वाक्यद्वये स्थितेपि कथं उपमा भवति समाधानमेवमुच्यते- एकस्मिन् वावये उपमानोपमेयो साम्यत्वे एव उपमालंकारः परन्तु परस्परं साकांक्ष वाक्यद्वये उपमानउपमेययोश्चेत् साम्यत्वं तिष्ठेत् तर्हि तत्र उपमालंकारः। तत्र चिन्तामणिविजयकाव्यविनिर्दिष्टानां केषांचित् उपमालंकाराणामुल्लेखः नीचैः विधीयते –

१. "यत्राङ्गना विजितदेवकलत्ररूपाः याः पर्यटन्ति विशिखासु मनोज्ञवेषा :।
तत्सौधजालकनिखातसुदर्पणेषु तासां प्रतीकविसराः प्रतिवेश्मरेजु : ।।"
२. "यस्यां निकेतननिोबद्ध सुयष्टिकाग्र ,प्रोताम्बराण्यपनयन्ति सदा चलन्ति ।
दिव्याह्नि हेलितुरगा नभिताड्य खिन्न बाहोश्श्रमं मिहिरभानुनिभारूणस्य ।।"[२०]
३. "हन्तहन्त एवैश्वर्यञ्चन्तारस्पर्शनमात्रतः।
यद्यन्मनसि तत्तद्धिनिसर्गादुदभूदिति ।।"

**रूपकालंकारः -** विश्वनाथकविराजेन रुपकालंकारस्य लक्षणमित्थं प्रतिपादयति 'रूपकं रूपितरोपो विषये निरपह्नवे।'[२१] अस्य तात्पर्यं निरपह्नवविषयेनाम शब्दतः अथवा तात्पर्यतः प्रतिषेधरहितोपमेय एव रूपकालंकारः भवति। आर्जवेन एतत् वक्तुं शक्यं यत् उपमेयविषये उपमानस्य अभेदारोपश्च रूपकालंकार उच्यते। अस्य व्युत्पत्तिस्तावत् रूपयति उपमानोपमेययोः अभेदारोपं करोतीति रूपकम् । तत्र उदाहरणम् –

नीते कलौकुमतिभिः कतिभिमनुष्यैः,
होमार्चनाजपसमाधिविलीनतां यः ।
भूमिं हिताय जगतामवतीर्य शम्भुः
अप्पय्यदीक्षित इति प्रतिभाति सूरिः ।।[२२]

गान्धर्वेण विवाहेण परिणीता त्वयान्वहम् ।
किं ब्रवीमि कुवेराय रम्भायैवाद्य भूपते ।।[२३]

**व्याजोक्तिः–**व्याजोक्तिरलंकारस्य लक्षणं यथा-'व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः।'[२४] अर्थात् उद्भिन्नस्य नाम कथंचित् प्रकाशितवस्तुनः व्याजपूर्वकं संगोपनम् एव व्याजोक्तिरलंकारः भवति। प्रकाशिततथ्यं व्याजपूर्ववचनेन अन्यथाकरणं व्याजोक्तिरूच्यते। व्याजोक्तिप्रकटिततथ्यं यावच्छक्यं गोपनेऽपि तत् प्रकटीभवति। तत्र उदाहरणं यथा -

"चराचराणां चरमाधिदेवो विरोधि विद्रावितबाणशक्तिः ।
निशम्य वैरिप्रहिताद्रिवृक्षान्दुरूहदण्डं समधत्तकालः ।।"

**सन्देहालंकारः**

तत्र सन्देहालंकारस्य लक्षणं तु इत्थं –

"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।
शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा ।।"[२५]

अत्र प्रकृतोपमेये उपमानस्य प्रतिभाद्वारा जातः संशयः सन्देहालंकार उच्यते । तस्य भेदत्रयं यथा- १-शुद्धः, २- निश्चयगर्भः तथा ३-निश्चयाऽन्तः ।

१. शुद्धः– यत्र संशये पर्यावसानं समाप्ति र्वा लक्ष्यते स तु शुद्धसन्देहालंकार उच्यते ।
२. निश्चयगर्भः–निश्चयगर्भः सन्देहालंकारः नाम निश्चयमध्य सन्देहालंकारः । यस्मिन् सन्दर्भे प्रारम्भे अवसाने मध्ये निर्णय अस्ति स निश्चयमध्य सन्देहालंकारः ।
३. निश्चयाऽन्त – यत्र आदौ संशय अन्ते च संशयः लक्षते । तथा उदाहरणं यथा –

"भद्र त्वं किं प्रमथगणपो वाथवा वैनतेयः,
प्रद्युम्नो वा पुरहरदयाप्राप्तकायस्तु स त्वम् ।
आहोस्वित् किं कुटिलहृदयेन स्मरेण प्रयुक्तः,
लोकालोकस्थितजनमिमं बाधितुं वागतोऽसि।।" इति ।

**उपसंहारः** - चिन्तामणिविजयचम्पूकाव्ये उपमालंकारस्य बाहुल्यं प्राशस्त्यं च अवधार्यते । विश्वनाथकविराजः अलंकारसम्बन्धे साहित्यदर्पणे प्रतिपादयति –

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीमुपकुर्वन्तोऽलंकारास्तेङ्गदादिवत् ।।"

अस्याभिप्रायः काव्यस्योत्कर्षवर्धकगुणरीति अलंकारेषु गुणरीतिवर्णनात् परम् अलंकारविषय पर्यालोचना निमित्तम् अलंकारलक्षणसन्दर्भे तेन कथितं यत् - शब्दार्थयोरस्थिरा- - - - - - यथा अस्थिरधर्मः कटककुण्डलादयः मनुष्याणाम् अङ्गप्रत्यङ्गे स्थिता शरीरशोभा प्रतनुते तथा आत्मनः उपकारा भाव्यन्ते तथैव काव्यशरीरं शब्दार्थयोरस्थिरधर्मरूपेण स्थित्वा यः काव्यात्मभूतरसस्य उपकारि भवति। स एव अलंकारकरणे व्युत्पत्तिः। अलं उपपदपूर्वं कृ धातोः रण् प्रतये अलंकारः पदसिद्धिः जायते। अलंकारनिसर्गतया अस्थिरधर्माः, गुणास्तु स्थिरधर्माः भवन्ति। काव्यस्य आत्मारूपेण विद्यमानरसानां स्थितिः समवायेन गुणस्थितिकल्पनीयत्वात् गुणस्थिरधर्मः कथ्यते। परन्तु अलंकाराणां संयोगसम्बन्धत्वात् तेषां अस्थिरधर्मत्वं उपकल्प्यते। अलंकारसम्प्रदायस्य भामहः वक्ति –

'न कान्तमपि निर्भूषं विभाति वनिता मुखं ।'

अर्थात् यथा आभूषणमन्तरा नारीमुखं नैव चकास्ति। तथैव अलंकारं विना काव्यमपि नैव शोभते। वामनदृष्ट्या अलंकृतिरलंकार: सौन्दर्यवोध एव अलंकार:। दण्डीमते 'काव्यशोभाकारान् धर्मान् अलंकारान् प्रचक्षते।' काव्यशोभावर्धकधर्म एव अलंकार:।

## संदर्भ सूची

१. छन्दोमञ्जरी – २ – (त्रिष्टुप् – २)
२. चिन्तामणिविजयचम्पू: - १/२३
३. छन्दोमञ्जरी – २/ (अतिघृति: - ३)
४. चिन्तामणिविजयचम्पू: - १/५
५. छन्दोमञ्जरी – २/ (त्रिष्टुप् - २)
६. चिन्तामणिविजयचम्पू: - ४/१३५
७. छन्दोमञ्जरी – २/ (त्रिष्टुप् - ५)
८. चिन्तामणिविजयचम्पू: - ४/१४७
९. छन्दोमञ्जरी – २/ (शर्करी - २)
१०. चिन्तामणिविजयचम्पू: - १/६
११. यजुर्वेद: - २३-३४
१२. चिन्तामणिविजयचम्पू: - २/५६
१३. माघ. शिशुपालवधम् – २/८६
१४. काव्यादर्श: - १/४
१५. व्सगङ्गाधर: - १/१
१६. भरत: नाट्यशास्त्रम् – अध्याय:-६
१७. अग्निपुराणम् – ३३७/३३
१८. साहित्यदर्पण: - १०/१४
१९. चिन्तामणिविजयचम्पू: - १/७
२०. साहित्यदर्पण: - १०/२८
२१. चिन्तामणिविजयचम्पू: - १/२
२२. चिन्तामणिविजयचम्पू: - २/३४
२३. साहित्यदर्पण: - १०/९२
२४. साहित्यदर्पण: - १०/३५